धातूपलः, पुं, (धातुः उपधातुरूप उपलः पाषाणः।) कठिनिका। इति हारावली।२१२॥

धातृपुत्त्रः, पुं, (धातुर्ब्रह्मणः पुत्त्रः।) सनत्कुमारः। इति शब्दरत्नावली॥ ब्रह्मणः सुतमात्रञ्च॥

धातृपुष्पिका, स्त्री, (धातृपुष्पी। स्वार्थे कन् पूर्व्वह्रस्वः। यद्वा, कप्। टापि अत इत्वम्।) धातकी। इत्यमरः।२।४।१२४॥

धातृपुष्पी, स्त्री, (धातृ पुष्टिकर्त्तृ पुष्पमस्याः। ङीप्।) धातकी। इति शब्दरत्नावली॥

धात्त्रं, क्ली, (धीयते अन्नाद्यत्रेति। धा+आधारे ष्ट्रन्।) भाजनम्। इति संक्षिप्तसारोणादिवृत्तिः॥

धात्त्रिका, स्त्री, (धात्त्री। स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) आमलकी। इति राजनिर्घण्टः॥

धात्त्री, स्त्री, (धीयते पीयते इति। धेट पाने+"सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४।१५८। इति कर्म्मणि ष्ट्रन्। षित्वात् ङीष्। अस्या स्तनदुग्धपानात्तथात्वम्। यद्वा, दधाति धरतीति। धा+तृच्+ङीप्।) माता। (यथा, याज्ञवल्क्यसंहितायाम्।३।८२।
"पुनर्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति।
अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते॥")
उपमाता। (यथा, रघुः।१०।७८।
"कुमाराः कृतसंस्कारास्ते धात्रीस्तनपायिनः।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः॥"
(कुमाररक्षाकर्त्री। धाइ इति भाषा॥ तस्याः परीक्षा यथा,"अतो धात्रीपरीक्षामुपदेक्ष्यामः। अथ ब्रूयात् धात्रीमानयेति समानवर्णां यौवनस्थां निभृतामनातुरामव्यङ्गामव्यसनामविरूपामजुगुप्सितां देशजातीयामक्षुद्रां अक्षुद्रकर्म्मिणीं कुले जातां वत्सलां जीववत्सां पुंवत्सां दोग्ध्रीमप्रमत्तामशायिनीमनुच्चारशायिनीमनन्तावशायिनीं कुशलोपचारां शुचिमशुचिद्वेषिणीं स्तन्यसम्पदुपेतामिति।"
"धात्री तु यदा स्याद्बहुलशुद्धदुग्धा स्यात्तदा स्नातानुलिप्ता शुक्लवस्त्रं परिधायैन्द्रीं ब्राह्मीं शतवीर्य्यां सहस्रवीर्य्यां मोघाममघां शिवामरिष्टां वाट्यपुष्पीं विष्वक्सेनकान्तामिति बिभ्रत्योषधीः कुमारं प्राङ्मुखं प्रथमं दक्षिणं स्तनं पाययेदिति धात्रीकर्म्म।" इति चरके शारीरस्थानेऽष्टमेऽध्याये॥*॥ (दधाति धारयति सर्व्वमिति। धा+तृच्+ङीप्।) क्षितिः। (गायत्त्रीस्वरूपिणी भगवती। यथा, देवीभागवते।१२।६।७८।
"धात्रीधनुर्धरा धेनुर्धारिणी धर्म्मचारिणी॥"
गङ्गा। यथा, काशीखण्डे।२९।६२।
"धर्म्मोर्म्मिवाहिनी धुर्य्या धात्री धात्रीविभूषणम्॥")
आमलकीवृक्षः। इति मेदिनी। रे, ४६॥ (अस्याः पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"धात्री कर्षफला तिष्या वयस्यामलकी शिवा॥")

अथ धात्र्याद्युत्पत्तिकारणम्।

वृन्दामरणक्षुब्धस्य विष्णोर्मोहापनोदाय रुद्रवाक्यादाद्यां शक्तिं स्तुवतो देवान् प्रति सा आह।
"अहमेतत्त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ते च ताः सुराः।
तास्तथा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्सलाः॥
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तदा।
इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठते॥
निर्वपध्वं ततः कार्य्यं भवतां सिद्धिमेष्यति।
क्षिप्तेभ्यस्तत्र बीजेभ्यो वनस्पत्यः स्त्रियोऽभवन्॥
धात्री च मालती चैव तुलसी च नृपोत्तम!।
धात्र्युद्भवा स्मृता धात्री माभवा मालती स्मृता॥
गौरीभवा च तुलसी तमःसत्त्वरजोगुणाः।
स्त्रीरूपिण्यो वनस्पत्यो दृष्ट्वा विष्णुस्तदा नृप!॥
उत्तस्थौ सम्भ्रमाद्वृन्दारूपातिशयविभ्रमात्॥"
अस्या माहात्म्यं यथा,—
"शृणुष्व धात्रीमाहात्म्यं सर्व्वपापहरं शुभम्।
यत् पुरा हरिणा प्रोक्तं वशिष्ठं प्रति नारद!॥
धात्री वत्स! नृणां धात्री मातृवत् कुरुते क्षमाम्।
दद्यादायुः पयः पानं स्नानाद्वै धर्म्मसञ्चयम्॥
अलक्ष्मीनाशनं सद्योऽप्यन्ते निर्व्वाणमेव च।
विघ्नानि नैव जायन्ते धात्रीस्नानेन वै नृणाम्॥
तस्मात् त्वं कुरु विप्रेन्द्र! धात्रीस्नानं हि यत्नतः।
प्रयास्यसि हरेर्धाम देवत्वं प्राप्य नारद!॥
यत्र यत्र मुनिश्रेष्ठ! धात्रीस्नानं समाचरेत्।
तीर्थे वापि गृहे वापि तत्र तत्र श्रियः स्थिताः॥
धात्रीस्नातानि दिवसे यस्यास्थीनि कलेवरे।
प्रक्षालितानि विप्रेन्द्र! न स स्याद्गर्भसम्भवः॥
धात्रीफलेन विप्रेन्द्र! येषां केशाश्च रञ्जिताः।
ते नराः केशवं यान्ति नाशयित्वा कलेर्मलम्॥
धात्रीफलं महापुण्यं स्नाने पुण्यतरं स्मृतम्।
पुण्यात् पुण्यतरं वत्स! भक्षणे मुनिपुङ्गव!॥
न गङ्गा न गया पुण्या न काशी न च पुष्करम्।
एकैव च यथा पुण्या धात्री माधववासरे॥
कार्त्तिके मासि विप्रेन्द्र! धात्रीस्नानं समाचरेत्।
यश्च तज्जलमश्नीयात् सोऽश्वमेधमवाप्नुयात्॥
धात्रीफलं स्मरेद्यस्तु सदैव मुनिसत्तम!।
प्राग्जन्मनि कृतात् पापात् मुच्यते नात्र संशयः।
संस्मरेद्यस्तु धात्रीं तामहन्यहनि मानवः॥
मुच्यते पातकैः सर्व्वैर्मनोवाक्कायसम्भवैः॥
धात्रीफलान्यमावास्यामष्टमीनवमीषु च।
रविवारे च संक्रान्तौ संस्मरेन्मुनिपुङ्गव!॥
यस्य गेहे मुनिश्रेष्ठ! धात्री तिष्ठति सर्व्वदा।
तस्य गेहं न गच्छन्ति प्रेतकुष्माण्डराक्षसाः॥
धात्रीस्नाने हरेर्नाम्नि जागरे हरिवासरे।
जन्मवन्धो विनश्येत हयमेधायुतं फलम्॥
स्नायादामलकैर्यस्तु कार्त्तिके हरिवत्सल!।
परितोषं समायाति तस्य वै माधवः स्वयम्॥
धात्रीच्छायां समासाद्य कुर्य्यात् श्राद्धस्तु यो मुने!।
मुक्तिं प्रयान्ति पितरः प्रसादात्तस्य वै हरेः॥
मूर्द्ध्नि पाणौ मुखे कण्ठे देहे च मुनिसत्तम!।
धत्ते धात्रीफलं यस्तु स महात्मा स पुण्यभाक्॥
धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः।
धात्रीफलकृताहारो नरो नारायणो भवेत्॥
यः कश्चिद्वैष्णवो लोके धत्ते धात्रीफलं मुने!।
प्रियो भवति विष्णोः स मनुष्याणाञ्च का कथा॥
धात्रीफलानि यो नित्यं वहते करसंपुटे।
तस्य नारायणो देवो वरमेकं प्रयच्छति॥
धात्रीफलं न मोक्तव्यं कदाचित् करसंपुटात्।
य इच्छेद्विपुलान् भोगानन्ते यो मुक्तिमिच्छति॥
धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि।
स वैष्णवो न विज्ञेयो विष्णुभक्तिपरोऽपि च॥
न त्याज्या तुलसीमाला धात्रीमाला विशेषतः।
तथा रुद्राक्षमालापि धर्म्मकामार्थमिच्छता॥
यावल्लुठति कण्ठस्था धात्रीमाला नरस्य हि।
तावन्मनसि हृत्स्थोऽपि सदा लुठति केशवः॥
यावद्दिनानि वहते धात्रीमालां करे नरः।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत्॥
सर्व्वदेवमयी धात्री वासुदेवमनःप्रिया।
आरोपणीया सेव्या च सेचनीया सदा बुधैः॥
एतत्ते सर्व्वमाख्यातं धात्र्या माहात्म्यमुत्तमम्।
श्रोतव्यञ्च सदा सद्भिश्चतुर्वर्गफलप्रदम्॥"
इति पाद्मोत्तरखण्डे १२७ अध्यायः॥
अपि च।
"तुलसीवृक्षमाश्रित्य या यास्तिष्ठन्ति देवताः।
आमलक्या अपि प्राज्ञ! तास्ता एव वसन्ति च॥
अशुभं वा शुभं वापि यत् कर्म्मामलकीतले।
क्रियते मानवैर्विप्र! भवेत्तत् सर्व्वमक्षयम्॥
पवित्रैर्नूतनैः पत्रैर्धात्र्या यः पूजयेद्धरिम्।
स मुक्तः पापजालेन सायुज्यं लभते हरेः॥
धात्री च तुलसी देवी न तिष्ठेद्यत्र जैमिने!।
स्थानं तदपवित्रं स्यान्न च पुण्यक्रिया फलेत्॥
धात्र्या हीनं तुलस्या च निलयं यस्य भूसुर!।
अलक्ष्मीः पातकं सर्व्वं कलिश्च तेन तोषितः॥
धात्रीकाष्ठस्य मालाञ्च यो वहेन्मतिमान्नरः।
तत् सर्व्वमक्षयं प्रोक्तं शुभं वाशुभमेव वा॥
यस्तु धात्रीफलं भुङ्क्ते मानवोऽखिलतत्त्ववित्।
तद्देहाभ्यन्तरस्थायि सर्व्वं पापं विनश्यति॥
धात्रीफलमयीं मालां वहते द्विजसत्तमः।
ब्रवीमि शृणु माहात्म्यं सर्व्वपापहरं शुभम्॥
श्मशानेऽपि यदा मृत्युस्तस्य स्याद्दैवयोगतः।
गङ्गामरणजं पुण्यं स प्राप्नोति न संशयः॥
नित्यं गृह्णाति यो धात्रीतुलसीमूलकर्द्दमम्।
दिने दिने लभेत् पुण्यं सोऽश्वमेधशतोद्भवम्॥
धात्रीतरुञ्च यो हन्ति सर्व्वदेवगणाश्रयम्।
स ददाति हरेरङ्गे घातं नात्र संशयः॥
सर्व्वदेवमयी धात्री विशेषात् केशवप्रिया।
सम्यग्वक्तुं गुणं तस्या ब्रह्मणापि न शक्यते॥"
इति क्रियायोगसारे २३ अध्यायः॥
यथा स्कान्दे।
"न धात्री सफला यत्र न विष्णोस्तुलसीदलम्।
तं म्लेच्छदेशं जानीयात् यत्र नायान्ति वैष्णवाः॥")
इत्येकादशीतत्त्वम्॥